# TERM-1 EXAMINATION (2026-27)

SANSKRIT (119)

Class: VI — Max. Marks: 80
Date : 09.09.2026 — Time: 3.00 Hour
Admission No: — Roll No:

---

सामान्यनिर्देशाः

1. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 4 पृष्ठानि मुद्रितानि सन्ति ।
2. कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे षोडशप्रश्नाः सन्ति ।
3. उत्तरलेखनात् पूर्व प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।
4. प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।
6. प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

---

## खण्ड–क : अपठितावबोधनम्

प्रश्न 1. अधोलिखितम् अपठितगद्यांशं पठित्वा तदाधारितप्रश्नानाम् उत्तराणि लिखत –
निम्नलिखित अपठित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर लिखिए।

वने एकः सिंहः निवसति स्म। सिंहः गुहायां शयनं करोति स्म। कश्चित् मूषकः तत्र आगत्य सिंहस्य शरीरे अधावत्। कुपितः सिंहः मूषकं करे गृहीतवान्। मूषकः निवेदयति— "मां मा मारय। अहं ते सहाय्यं करिष्यामि।" सिंहः हसन् अवदत्— "लघुमूषकः मम सहाय्यं कथं करिष्यति?" एकदा सिंहः जाले अपतत्। सः उच्चैः अगर्जत्। तस्य गर्जनं श्रुत्वा मूषकः आगच्छत्। सः जालं दन्तैः अकर्तयत्। बन्धनमुक्तः सिंहः अवदत्— "मित्रं तु लघु अपि वरम्।"

(क) एकपदेन उत्तरत - (1×2=2)

1. सिंहः कुत्र निवसति?
2. सिंहः कुत्र अपतत्?

(ख) पूर्णवाक्येन उत्तरत- (2×2=4)

1. मूषकः किं निवेदयति?
2. सिंहः किम् अवदत्?

(ग) निर्देशानुसारं भाषिककार्यं कुरुत- (1×4=4)

1. *"मूषकः जालं दन्तैः अकर्तयत्।"* अस्मिन् वाक्ये क्रियापदं किम्?
   (क) मूषकः (ख) जालम्
   (ग) दन्तैः (घ) अकर्तयत्
2. *"सिंहः शयनं करोति स्म।"* अस्मिन् वाक्ये कर्तृपदं किम्?
   (क) सिंहः (ख) शयनम्
   (ग) करोति (घ) स्म
3. *"मूषकः अधावत्।"* 'अधावत्' इति पदे कः लकारः अस्ति?
   (क) लट् लकारः (ख) लृट् लकारः
   (ग) लङ् लकारः (घ) लोट् लकारः
4. *"एकदा जाले सिंहः अपतत्।"* अस्मिन् वाक्ये अव्ययपदं किम्?
   (क) एकदा (ख) जाले
   (ग) सिंहः (घ) अपतत्

## खण्ड–ख : व्यावहारिकव्याकरणम्

प्रश्न 2. वचनाधारितानां प्रश्नानाम् उत्तराणि चित्वा लिखत - (1×3=3)

(1) 'छात्रः' शब्दस्य द्विवचनं किम्? *('छात्रःशब्द का द्विवचन क्या है '?)*

(क) छात्रे (ख) छात्रौ

(ग) छात्राः (घ) छात्रैः

(2) 'लेखनी' शब्दस्य बहुवचनं किम्? *('लेखनीशब्द का बहुवचन क्या है '?)*

(क) लेखन्ये (ख) लेखन्यौ

(ग) लेखन्यः (घ) लेखनीभ्याम्

(3) 'पुष्पाणि' शब्दस्य एकवचनं किम्? *('पुष्पाणिशब्द का एकवचन क्या है '?)*

(क) पुष्पाणाम् (ख) पुष्पम्

(ग) पुष्पे (घ) पुष्पौ

प्रश्न 3. लिङ्गाधारितानां प्रश्नानाम् उत्तराणि चित्वा लिखत - (1×3=3)

(1) <u>बालकः</u> पाठं पठति।रेखाङ्कितस्य शब्दस्य स्त्रीलिङ्गं किम्?*(रेखांकित शब्द का स्त्रीलिंग क्या है?)*

(क) बालिकौ (ख) बालिका

(ग) बालिके (घ) बालिकाः

(2) माता भोजनं पचति। रेखाङ्कितस्य शब्दस्य पुंल्लिङ्गं किम्? *(रेखांकित शब्द का पुल्लिंग क्या है?)*

(क) मातरौ (ख) पितरौ

(ग) पिता (घ) पितरः

(3) दत्तेषु शब्देषु नपुंसकलिङ्गः शब्दः कः? *(दिए गए शब्दों में नपुंसकलिंग शब्द कौनसा है-?)*

(क) अध्यापकः (ख) नदी

(ग) कमलम् (घ) लता

प्रश्न 4. कारकाधारितानां प्रश्नानाम् उत्तराणि चित्वा लिखत - (1×3=3)

(1) बालकः ज्ञानं नयति। रेखाङ्किते शब्दे कः कारकः अस्ति? *(रेखांकित शब्द में कौनसा कारक है-?)*

(क) प्रथमा – कर्तृकारकः (ख) द्वितीया – कर्मकारकः

(ग) तृतीया – करणकारकः (घ) चतुर्थी – सम्प्रदानकारकः

(2) रामस्य पुत्रः लवः अस्ति। रेखाङ्किते शब्दे कः कारकः अस्ति? *(रेखांकित शब्द में कौनसा कारक है-?)*

(क) पञ्चमी – अपादानकारकः (ख) षष्ठी – सम्बन्धकारकः

(ग) सप्तमी – अधिकरणकारकः (घ) चतुर्थी – सम्प्रदानकारकः

(3) छात्रः गृहं गच्छति। रेखाङ्किते शब्दे कः कारकः अस्ति? *(रेखांकित शब्द में कौनसा कारक है-?)*

(क) प्रथमा – कर्तृकारकः (ख) द्वितीया – कर्मकारकः

(ग) तृतीया – करणकारकः (घ) चतुर्थी – सम्प्रदानकारकः

प्रश्न 5. उचितैः अव्ययपदैः रिक्तस्थानानि पूरयत - *(उचित अव्ययपदों से रिक्त स्थान भरिए।(* (1×3=3)

मञ्जूषा : (कदा, अद्य, पुरा)

(क) _________ मम संस्कृतविषयस्य परीक्षा अस्ति।

(ख) छात्रः संस्कृतम् _________ पठति ?

(ग) _________ भारते राजा रामः आसीत्।

प्रश्न 6. सङ्ख्यावाचकैः शब्दैः रिक्तस्थानानि पूरयत-*(सङ्ख्यावाची शब्द से रिक्त स्थान भरिए।)* (1×5=5)

(1) (1) _______ सूर्यः विश्वं प्रकाशयति।

(क) एकः (ख) पञ्च

(ग) अष्ट (घ) चत्वारि

(2) मम कक्षायां (7) _______ विषयाः भवन्ति।

(क) त्रीणि (ख) सप्त

(ग) अष्टादश (घ) चत्वारिंशत्

(3) अहं (13) ________ वर्षीयः अस्मि।

(क) त्रयोदश (ख) सप्तविंशतिः

(ग) अष्टादश (घ) चतुर्विंशतिः

(4) मम गृहे (18) ________ जनाः सन्ति।

(क) त्रयोदश (ख) सप्तविंशतिः

(ग) अष्टादश (घ) चतुर्विंशतिः

(5) मम विद्यालये (30) ________ कक्षाः सन्ति।

(क) त्रयोदश (ख) त्रयोविंशतिः

(ग) त्रिंशत् (घ) त्रयस्त्रिंशत्

प्रश्न 7. अधोलिखितानां शब्दानाम् अर्थान् लिखत - *(नीचे लिखे शब्दों के अर्थ लिखिए।)* (1×5=5)

1. महिले — ____________________
2. पुस्तकानि — ____________________
3. तानि भवनानि — ____________________
4. ते बालकाः — ____________________
5. ताः अध्यापिकाः — ____________________

प्रश्न 8. अधोलिखितयोः धात्वोः एकस्य धातुरूपं लिखत – *(किसी एक धातु का धातुरूप लिखिए।)* (3)

(1) गम् धातोः लङ्-लकारे (भूतकाले)

(2) पठ् धातोः लृट्-लकारे (भविष्यत्काले)

प्रश्न 9. अधोलिखितयोः शब्दयोः एकस्य शब्दरूपाणि लिखत- *(एक शब्द का शब्दरूप लिखिए।)* (5)

(1) अकारान्तः पुंल्लिङ्गः 'राम' शब्दः

(2) आकारान्तः स्त्रीलिङ्गः 'लता' शब्दः

## खण्ड–ग : पाठ्यपुस्तकम्

प्रश्न 10. अधोलिखितं पठित गद्यांशं पठित्वा एतदाधारितप्रश्नानाम् उत्तराणि चिनुत। (1+2+2=5)

निम्नलिखित पठित गद्यांश को पढ़कर उस पर आधारित प्रश्नों के उत्तर लिखिए।

एकस्मिन् दिने काकः शुकः च मिलित्वा भोजनान्वेषणार्थं किञ्चित् ग्रामं गच्छतः। तौ कस्यचित् कृषकस्य गृहं परितः भोजनान्वेषणं कुरुतः। काकः तु क्षेत्रं परितः विद्यमानान् कीटान् आहारकणान् च खादति। शुकः तु आम्रवृक्षम् आरुह्य आम्रफलं खादति। शुकस्य "मिट्ठू"मिट्ठू- इति शब्दं श्रुत्वा कृषकः आगच्छति शिलाखण्डं च क्षिपति।

(क (एकपदेन उत्तरत- )एक पद में उत्तर दीजिए( (1)

(1) "मिट्ठूइति श्रुत्वा कः आगच्छति "मिट्ठू-?

(ख) एकवाक्येन उत्तरत - (एक वाक्य में उत्तर दीजिए) (2)

1. तौ कस्य गृहं परितः भोजनान्वेषणं कुरुतः?
2. काकः क्षेत्रं परितः कान् खादति?

(ग) निर्देशानुसारं भाषिककार्यं कुरुत - (निर्देश के अनुसार उत्तर दीजिए) (2)

1. "तौ ग्रामं गच्छतः।"अस्मिन् वाक्ये क्रियापदं किम्? (वाक्य में क्रियापद क्या है)

   (क) तौ (ख) भोजनान्वेषणार्थम्

   (ग) किञ्चित् ग्रामम् (घ) गच्छतः

2. "शुकः तु आम्रफलं खादति।"अस्मिन् वाक्ये कर्तृपदं किम्? (वाक्य में कर्तृपद क्या है)

   (क) शुकः (ख) तु

   (ग) आम्रफलम् (घ) खादति

प्रश्न 11. अधोलिखितप्रश्नानाम् उत्तराणि लिखत-

(अ) एकपदेन उत्तरत - (प्रश्नद्वयम्) (1×2=2)

(i) के रक्षन्ति?

(ii) किं विकसति?

(iii) कौ गर्जतः?

(आ) पूर्णवाक्येन उत्तरत - (प्रश्नत्रयम्) (2×3=6)

(i) क्रिया किम् उच्यते? (क्रिया किसे कहते हैं?)

(ii) मध्यमपुरुषः कः उच्यते? (माध्यमपुरुष किसे कहते हैं?)

(iii) लकारः कः उच्यते? (लकार किसे कहते हैं?)

(iv) प्रथमपुरुषः कः उच्यते? (प्रथमपुरुष किसे कहते हैं?)

प्रश्न 12. अधोलिखितयोः श्लोकांशयोः समुचितं मेलनं कुरुत। (1×6=6)

| (क) | (ख) |
|---|---|
| विद्या ददाति विनयम् | श्वाननिद्रा तथैव च |
| काकचेष्टा बको ध्यानम् | सर्वे सन्तु निरामयाः |
| सर्वे भवन्तु सुखिनः | विनयाद् याति पात्रताम् |
| पात्रत्वात् धनमाप्नोति | विद्यार्थी पञ्चलक्षणम् |
| अल्पाहारी गृहत्यागी | मा कश्चित् दुःख भाग भवेत् |
| सर्वे भद्राणि पश्यन्तु | धनाद् धर्मं ततः सुखम् |

## खण्ड–घ : लेखनकौशलम्

प्रश्न 13. अधोलिखितं चित्रं दृष्ट्वा मञ्जूषायाः सहायतया पञ्च संस्कृतवाक्यानि लिखत- (5)




प्रश्न 14. अधोलिखितां कथां मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा पुनः लिखत। (5)

*(नीचे लिखी कथा को मञ्जूषा में दिए गए शब्दों की सहायता से पूरा करके पुनः लिखिए।)*

एषः (1) _________ अस्ति। रमणः एकः (2) _________ अस्ति। सः (3) _________ प्रातः उत्तिष्ठति। (4) _________ च करोति। ततः सः (5) _________ गच्छति। तत्र (6) _________ च पठति। सः सदा (7) _________ वदति। सः एकः (8) _________ छात्रः अस्ति। सः (9) _________ कलहं न करोति। सः सर्वेषां (10) _________ छात्रः अस्ति।

मञ्जूषा : -(व्यायामम्, छात्रः, कदापि, रमणः, सदा, सत्यम्, विद्यालयम्, आदर्शः, पुस्तकानि, प्रियः)

प्रश्न 15. स्वपरिचयस्य विषये संस्कृतेन पञ्च वाक्यानि लिखत - (5)

*(पाँच वाक्य में अपना परिचय संस्कृत में लिखिए।)*

प्रश्न 16. कौऽपि द्वौ सुभाषितश्लोकौ लिखत - *(कोई भी दो सुभाषित-श्लोक लिखिए।)* (6)

*********************